ज्ञान-विज्ञान विमुक्तये
Approved by UGC

ISSN 2348-7828

# वेदविपाशा

## (VEDA VIPASHA)

Multidisciplinary Peer Reviewed Annual Research Journal

Vol. 05

2018



योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

**VEDAVYAS CAMPUS**
Rashtriya Sanskrit Sansthan, Balahar
Himachal Pradesh-177108
www.rsksbalahar.ac.in

UGC APPROVED

ISSN 2348-7828

# VEDA VIPASHA

MULTIDISCIPLINARY PEER REVIEWED ANNUAL RESEARCH JOURNAL

VOL. 05. 2018

PATRON

PROF. P.N. SHASTRI

CHIEF EDITOR

PROF. LAXMI NIWAS PANDEY

EDITOR

DR. P.V.B. SUBRAHMANYAM

EDITORIAL COMMITTEE

Dr. A.C. Gaur
Dr. G.S. Vidyarthi
Sh. P.C. Mohapatra
Dr. Prushottam
Dr. S.K. Mahanti
Dr. Bhagaban Samantaray
Dr. S. L. Seetharama Sharma
Dr. N.V. Subramanian

Co-ordinated by IQAC

# विषयसूची


1. व्यञ्जना अनुमानं च — आचार्य: जी. यस्. आर्. कृष्णमूर्ति:
2. अद्वैततत्त्वानुगुण्यानि ब्रह्मसूत्राणि — डॉ. भगवान सामन्तराय:
3. वोपदेवस्य व्याकरणं प्रति योगदानम् — डॉ. महेन्द्र
4. संस्कृतेन विश्वकल्याणम् — डॉ. गणेश शंकर विद्यार्थी
5. ब्रह्मणो जगत्कारणत्वम् — डॉ. वासुमोहन:
6. क्षेत्रज्ञं चापि मां विद्धि — डॉ. के. श्री समीरजा
7. पाण्डुग्रन्थानां सम्पादने व्याकरण-शास्त्रास्योपयोगिता — डॉ. सच्चिदानन्दस्नेही
8. संस्कृतसाहित्ये संगीतकला — श्री अमित शर्मा
9. ज्योतिषशिक्षणे ह्यूरिस्टिकविधे: अनुप्रयोग: — डॉ. मुकेशशर्मा
10. संस्कृतवाङ्मये अष्टांगायुर्वेदस्य स्वरूपं महत्वं च — सुश्री चन्द्रिका
11. स्मृतिवाङ्मये दायभागविमर्श: — श्री अकुंशकुमार:
12. पुराणेषु सृष्टिविज्ञानम् — श्री बृजेशचन्द्र उपाध्याय:
13. उत्तररामचरिते वर्णितानां वनस्पतीनामौषधीयं महत्त्वम् — श्री मूलराज:
14. प्राच्यपाश्चात्यदृशा शब्दस्य नित्यानित्यत्वविमर्श: — श्री परमानन्द:
15. संस्कृतविज्ञानयो: अन्त: सम्बन्ध: — श्री रजत गौतम:
16. रावणार्जुनीयमहाकाव्यस्य दशमसर्गे व्याकरणम् — श्री मुनीष कुमार:
17. नव्यवैयाकरणानामभिमतं धात्त्वर्थविचार: — श्री मनोज
18. युंगमहोदयानुसारं व्यक्तित्वस्य प्रकारा: — सुश्री रेखा कुमारी
19. चतुर्थी विभक्ति: — डॉ. एन्. वी. सुब्रह्मण्यम्
20. व्याकरणशास्त्रपरम्परायां महाकविभूमभट्टस्य योगदानम् — श्री मनोज
21. व्याकरणे करणलक्षणम् — श्री नीरज शर्मा
22. शम्भलीमतकाव्ये अलङ्कारयोजना — श्रीमती पुष्पा देवी
23. वास्तुशास्त्रसमीक्षणम् — डॉ. मनोज श्रीमाल
24. आचार्यरेवाप्रसादद्विवेदिप्रणीते उत्तरसीता-चरितमहाकाव्ये सूक्तिसौन्दर्यम् — श्री श्याम बाबू
25. भारतीयाध्ययनसमय: — डॉ. ई. वेङ्कटेश्वर्लु
26. सम्प्रेषणम् — डॉ. बी. वी. लक्ष्मीनारायण:
27. संस्कारविवेक: — श्री के. बी. सी. एम्. श्रीनिवास शर्मा
28. महाभारते स्त्रीशिक्षा — श्री दिनेशकुमार:
29. शब्दशास्त्रस्य सर्वशास्त्रोपकारकत्वविमर्श: — डॉ. देवनाथ पाल
30. पाणिनीयपरिभाषासूत्राणां एवञ्च परिभाषेन्दुस्थपरिभाषाणां भेद: — श्री मनीषशर्मा
31. भाषाशिक्षणे प्रतिरूपणसिद्धान्त: — डॉ. सो. ल. सीतारामशर्मा
32. कर्मण: विवेचनम् — श्री विपिनकुमार:
33. वैदिकदर्शनेष्वात्मस्वरूपविमर्श: — डॉ. संदीपशर्मा
34. विद्यालयरूपेण ब्रह्मचर्याश्रमा: — डॉ. ई. वेङ्कटेश्वर्लु
35. पं. सुन्दरलालशर्मण: छत्तीसगढ़ी-पद्यकाव्येषु रसानां प्रभाव: — श्री रूपेन्द्रकुमार तिवारी
36. संस्कृतसाहित्ये काव्योद्भव: कृष्णकाव्यपरम्परा च — डॉ. सेवकरामशास्त्री
37. भारतीय संस्कृति में काशी : एक अध्ययन — डॉ. धनञ्जय वासुदेव द्विवेदी
27. चित्तवृत्ति विमर्श — सुश्री स्वीटी रानी
28. बिलासपुर मण्डल की पर्वतीय भाषा का समीक्षण — सुश्री गायत्री शर्मा
29. व्याकरण शास्त्र में पञ्चसन्धि — डॉ. अनिता भार्गव
30. योगदर्शन का नैतिक एवं सामाजिक पक्ष-वर्तमान भारतीय सामाजिक परिप्रेक्ष्य में — सुश्री मीनाक्षी जोशी
31. अनर्घराघव वर्णित धर्म एवं सम्प्रदाय — श्री कर्ण शर्मा
32. प्राचीन भारत का शिक्षा-तन्त्र — श्री राजेश कुमार
33. आधुनिक संस्कृत नाट्य साहित्य में वर्णित लिङ्ग भेद की समस्या — डॉ. सन्ध्या मिश्रा
34. महर्षि पतंजलि द्वारा प्रतिपादित योग एवं नियम का स्वरूप — डॉ. रविकुमार शास्त्री
35. कालिकापुराण का राजनीतिक एवं प्रशासनिक विश्लेषण — डॉ. विवेकशर्मा
36. श्रीरामचरितमानस और जनमानस — श्री पीयूष कुमार त्रिपाठी
37. संस्कृतकाव्यशास्त्र में अलङ्कार (व्युत्पत्ति-विकास-काव्यशास्त्र में स्थान) — सुश्री मनुबाला
38. महर्षि चरक की दृष्टि में योग का स्वरूप — श्री वेदप्रकाश आर्य
39. हितोपदेश — श्री राजिन्द्र कुमार
40. ईशावास्योपनिषद् में शान्ति शिक्षा — श्री कपिल शर्मा
41. गायत्री साधना का महत्त्व — श्री ललित कुमार शर्मा
42. पुराणों में भारत — श्री तिलक राज
43. The Concept of Lord Macaulay in the growth of Modern Indian Education — Dr. Ram Narayan Thakur
44. The Complete History of Computer — Sh. Amit Walia
46. Purusha Sukta -The Hymn of Thermodynamics — Sh. Mahesh
47. Money is Not Everything — Sh. Rajinder Kumar

ISSN 2348-7828

# चतुर्थी विभक्तिः

डॉ. एन. वी. सुब्रह्मण्यम्

चतुर्थी विभक्तिः द्विविधा, कारकचतुर्थी, उपपदचतुर्थी इति। सम्प्रदानसंज्ञां निमित्तीकृत्य चतुर्थीविभक्तिः प्रवर्तते। कर्मणा यमभिप्रैति स सम्प्रदानम्, धारेरुत्तमर्णः, रुच्यर्थानां प्रीयमाणः, इत्यादिभिः सूत्रैः सम्प्रदानसंज्ञा विधीयते। इमां सम्प्रदानसंज्ञां पुरस्कृत्य प्रवर्तते चतुर्थी विभक्तिः एका। नमःस्वस्तिस्वाहास्वधाऽलम्वषड्योगाच्च हितयोगे च, इत्यादिभिः सूत्रैः तत्तत्पदयोगे प्रर्वतमाना चतुर्थीविभक्तिः अपरा। तत्र कारकचतुर्थ्याः सम्प्रदानत्वशक्तिः क्रियाकारकभावसम्बन्धः तद्गतं विशेषणत्वं च अर्थः। सम्प्रदानत्वशक्तिः नाम कर्मनिष्ठफलनिरूपकत्वेन इच्छाविषयः यः तन्निष्ठा शक्तिः सम्प्रदानशक्तिः इत्युच्यते। अयं च अर्थः कर्मणा यमभिप्रैति स सम्प्रदानम् इत्यनेन सूत्रेण लभ्यते। अध्याहारेणैव यं सः इति सर्वनाम द्वयार्थस्य लाभे सूत्रे यं सः इत्यनयोः ग्रहणं किमर्थम् इति प्रश्नः। अभिप्रैति इति कर्तृतिङ्श्रवणात् यः सः इत्येव अर्थलाभः स्यात्। तथा सति यः कर्मणाभिप्रैति स सम्प्रदानम् इत्येव अर्थसिद्ध्या, कर्तुः सम्प्रदानसंज्ञापत्तिः इति दोषः । प्रथमा पच्यादौ सावकाशा । एवं सति राज्ञा विप्राय गौः दीयते इत्यर्थे राज्ञे विप्रस्य गौः दीयते इति प्रयोगः आपद्येत। अतः तद्वारणाय यं सः ग्रहणं सूत्रे आवश्यकम्। सूत्रे कर्मणा इति पदनिवेशात् सम्प्रदानत्वं प्रति कर्मणः निमित्तत्वमवगम्यते। तथा सति कर्मणः चतुर्थ्याः निमित्तत्वप्रदर्शनात् द्वितीयाश्रुत्यापेक्षया चतुर्थीश्रुतेः बलवत्त्वं प्रतीयते। तेनः क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति, इत्यत्र दण्डदानं न प्रतिपतिकर्म अपि तु अर्थकर्म।

कर्मणः चतुर्थीं प्रति निमित्तत्वावगमात् चतुर्थ्याः बलवत्त्वं प्रतीयते। अतः चतुर्थ्याः बलवत्त्वात् मैत्रावरुणाय प्रयच्छति इत्यत्र चतुर्थी श्रुत्या दण्डदानाख्या क्रियायागे अपूर्वजनिका इति दण्डदानकर्मण अर्थकर्मत्वम् अवगम्यते। न तु नीतासु दक्षिणासु कृष्णविषाणं चात्वाले प्रास्यति, इत्यत्र कृष्णविषाणप्रासनस्य प्रतिपत्तिकर्म इव न दण्डदानस्य प्रतिपत्ति-कर्मत्वम्।

अत्रैव पत्ये शेते इत्यादि प्रयोगसाधनाय वार्तिककृता वार्तिकम् इदमारब्धं यत् - क्रियया यमभिप्रैति स सम्प्रदानम् इति। यमुद्दिश्य कर्ता क्रियां करोति स सम्प्रदानम् इति तदर्थः। एवञ्च वार्तिकम् अकर्मकधातुस्थले प्रवर्तते। अतः कर्मकारकस्य अभावात् सूत्रेण पत्ये शेते इत्यादौ पत्युः सम्प्रदानत्वाप्राप्त्या वार्तिकमारब्धम्। भाष्यकारस्तु इदं वार्तिकं प्रत्याचख्यौ। सः सन्दर्भः अत्र निरूप्यते। कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रे कर्मशब्देन कर्मकारकं क्रिया एतदुभयं गृह्यते। अतः क्रियया यमभिप्रैति तस्यापि सम्प्रदानत्वसिद्ध्या वार्त्तिकस्य अनावश्यकत्वं प्रकटितम् । तत्र पुनः आक्षेपः कृतः कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः इति न्यायेन कर्मशब्देन कृत्रिमस्य कर्मकारकस्य एव ग्रहणं न तु क्रियायाः। अतः वार्त्तिकम् आवश्यकमेव इति आक्षिप्यते। क्रियापि कृत्रिमं कर्म इत्युक्तम्। एवं क्रियायाः कृत्रिमकर्मत्वं व्यवस्थापितं। तद्इ्थ-

**कतुरीप्सिततमं कर्म** इति सूत्रेण क्रियायाः अपि कर्मसंज्ञासिद्ध्या पत्ये शेते इत्यत्र शयनक्रियायाः अपि सन्दर्शन-प्रार्थन-व्यवसाय-आरम्भण-क्रियानिरूपितं कर्मत्वं वर्तते। क्रियापि कृत्रिमं कर्म। क्रियापि क्रियया ईप्सिततमा भवति। कया क्रियया इति चेत् सन्दर्शनक्रियया प्रार्थयतिक्रियया, अध्यवस्यतिक्रियया, आरम्भणक्रियया, निर्वृत्तिक्रियया च। सन्दर्शनोत्तरं प्रार्थना, प्रार्थनायाम् अध्यवसायः, अध्यावसाये आरम्भः, आरम्भे निर्वृत्तिः, निवृत्तौ फलावाप्तिः, एवं क्रियापि कृत्रिमं कर्म भवति। अत्र सन्दर्शनं नाम फलविषयकसङ्कल्पः। सन्दर्शने जाते प्रार्थना अर्थात् फलोपायविषये अभिलाषा। तथा प्रार्थनया व्यवसायः जायते। व्यवसायो नाम क्रियाविशेषस्य फलसाधनत्वेन निश्चयः। व्यवसायाद् अनन्तरम् आरम्भः जायते। आरम्भो नाम मानसिकप्रवृत्तिः। तज्जन्यभौतिकक्रिया निर्वृत्तिः। एवं रीत्या सन्दर्शनादिभिः उतरोत्तर-जन्यमानक्रियाभिः शयनक्रिया सिद्ध्यति। तेन प्रकारेण शयनक्रियायाश्च कृत्रिमकर्मत्वं सिद्धम्। अतः कर्मसंज्ञकशयनक्रियया पतिः अभिप्रेतः इति पत्युः सम्प्रदानसंज्ञा कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेणैव सिद्धा। तथा च क्रियया यमभिप्रैति स सम्प्रदानम् इति वार्त्तिकं न आरम्भणीयम् इति भाष्ये उक्तम्। एवं सति कटं करोति इत्यत्र कटस्यापि सम्प्रादनत्वं स्यात् इति चेन्न, यदा तु सन्दर्शनादिक्रियासमुदायः परस्परम् अङ्गाङ्गिभावम् अनापन्नः सन् एकफलोपदेशेन प्रवृत्तत्वात्। तेषां सन्दर्शनादिक्रियाणाम् अभेदेन धातुना अनभिधानात् न सम्प्रदायनत्वम्, यदा सन्दर्शनादिक्रियासमुदायः भेदेन प्रतीयते तदा साध्यसाधनभावस्य प्रतीत्या। यदा अभेदेन प्रतीयते, तदा कर्मत्वमेव, न तु सम्प्रदानत्वम् इति विवेकः। तदुक्तं हरिणा